वरिष्ठ अध्यापक प्रतियोगी परीक्षा - 2024 (माध्य शिक्षा विभाग)　　　　　　दृष्टिबाधित

**इस प्रश्न पुस्तिका को तब तक न खोलें जब तक कहा न जाए। / Do not open this Question Booklet until you are asked to do so.**

पुस्तिका में पृष्ठों की संख्या : **24**
No. of Pages in Booklet : **24**
पुस्तिका में प्रश्नों की संख्या : **150**
No. of Questions in Booklet : **150**
Paper Code : **04**

**Subject : Sanskrit**

# SST-25

## Paper-II

परीक्षा तिथि - 10/09/2025

प्रश्न पुस्तिका संख्या व बारकोड / Question Booklet No. & Barcode
4040533

समय : **02:30 घण्टे + 10 मिनिट अतिरिक्त***
Time : **02:30 Hours + 10 Minutes Extra***

अधिकतम अंक : **300**
Maximum Marks: **300**

प्रश्न पुस्तिका के पेपर की सील / पॉलिथिन बैग को खोलने पर प्रश्न पत्र हल करने से पूर्व परीक्षार्थी यह सुनिश्चित कर लें कि :–
- प्रश्न पुस्तिका संख्या तथा ओ.एम.आर. उत्तर–पत्रक पर अंकित बारकोड संख्या समान है।
- प्रश्न पुस्तिका एवं ओ.एम.आर. उत्तर–पत्रक के सभी पृष्ठ व सभी प्रश्न सही मुद्रित हैं। समस्त प्रश्न जैसा कि ऊपर वर्णित है, उपलब्ध हैं तथा कोई भी पृष्ठ कम नहीं है / मुद्रण त्रुटि नहीं है।

किसी भी प्रकार की विसंगति या दोषपूर्ण होने पर परीक्षार्थी वीक्षक से दूसरी प्रश्न पुस्तिका प्राप्त कर लें। यह सुनिश्चित करने की जिम्मेदारी अभ्यर्थी की होगी। परीक्षा प्रारम्भ होने के **5** मिनट पश्चात् ऐसे किसी दावे / आपत्ति पर कोई विचार नहीं किया जायेगा।

On opening the paper seal/polythene bag of the Question Booklet before attempting the question paper the candidate should ensure that:-
- Question Booklet Number and Barcode Number of OMR Answer Sheet are same.
- All pages & Questions of Question Booklet and OMR Answer Sheet are properly printed. All questions as mentioned above are available and no page is missing/misprinted.

If there is any discrepancy/defect, candidate must obtain another Question Booklet from Invigilator. Candidate himself shall be responsible for ensuring this. No claim/objection in this regard will be entertained after **five** minutes of start of examination.

### परीक्षार्थियों के लिए निर्देश

1. **प्रत्येक प्रश्न के लिये एक विकल्प भरना अनिवार्य है।**
2. सभी प्रश्नों के अंक समान हैं।
3. प्रत्येक प्रश्न का मात्र एक ही उत्तर दीजिये। एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा।
4. **OMR** उत्तर–पत्रक इस प्रश्न पुस्तिका के अन्दर रखा है। जब आपको प्रश्न पुस्तिका खोलने को कहा जाए, तो उत्तर–पत्रक निकाल कर ध्यान से केवल **नीले बॉल प्वाइंट पेन** से विवरण भरें।
5. कृपया अपना रोल नम्बर ओ.एम.आर. उत्तर–पत्रक पर सावधानीपूर्वक सही भरें। गलत रोल नम्बर भरने पर परीक्षार्थी स्वयं उत्तरदायी होगा।
6. **ओ.एम.आर. उत्तर–पत्रक में करेक्शन पेन / व्हाईटनर / सफेदा का उपयोग निषिद्ध है।**
7. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा।** गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है।
8. **प्रत्येक प्रश्न के पांच विकल्प दिये गये हैं, जिन्हें क्रमशः 1, 2, 3, 4, 5 अंकित किया गया है। अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले (बबल) को उत्तर–पत्रक पर नीले बॉल प्वाइंट पेन से गहरा करना है।**
9. **यदि आप प्रश्न का उत्तर नहीं देना चाहते हैं, तो उत्तर–पत्रक में पांचवें (5) विकल्प को गहरा करें। यदि पांच में से कोई भी गोला गहरा नहीं किया जाता है, तो ऐसे प्रश्न के लिये प्रश्न अंक का 1/3 भाग काटा जायेगा।**
10. ***प्रश्न पत्र हल करने के उपरांत अभ्यर्थी अनिवार्य रूप से ओ.एम.आर. आंसर शीट जांच लें कि समस्त प्रश्नों के लिये एक विकल्प (गोला) भर दिया गया है। इसके लिये ही निर्धारित समय से 10 मिनट का अतिरिक्त समय दिया गया है।**
11. **यदि अभ्यर्थी 10% से अधिक प्रश्नों में पांच विकल्पों में से कोई भी विकल्प अंकित नहीं करता है, तो उसको अयोग्य माना जायेगा।**
12. **मोबाइल फोन अथवा इलेक्ट्रॉनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है। यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है, तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी।**

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए और **राजस्थान सार्वजनिक परीक्षा (भर्ती में अनुचित साधनों की रोकथाम अध्युपाय) अधिनियम, 2022 तथा अन्य प्रभावी कानून एवं आयोग के नियमों–प्रावधानों** के तहत कार्यवाही की जाएगी। साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है।

### INSTRUCTIONS FOR CANDIDATES

1. **It is mandatory to fill one option for each question.**
2. All questions carry equal marks.
3. Only one answer is to be given for each question. If more than one answers are marked, it would be treated as wrong answer.
4. The **OMR** Answer Sheet is inside this Question Booklet. When you are directed to open the Question Booklet, take out the Answer Sheet and fill in the particulars carefully with **BLUE BALL POINT PEN** only.
5. Please correctly fill your Roll Number in OMR Answer Sheet. Candidate will himself/herself be responsible for filling wrong Roll Number.
6. **Use of Correction Pen/Whitener in the OMR Answer Sheet is strictly forbidden.**
7. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question.
8. **Each question has five options marked as 1, 2, 3, 4, 5. You have to darken only one circle (bubble) indicating the correct answer on the Answer Sheet using BLUE BALL POINT PEN.**
9. **If you are not attempting a question, then you have to darken the circle '5'. If none of the five circles is darkened, one third (1/3) part of the marks of question shall be deducted.**
10. ***After solving the question paper, candidate must ascertain that he/she has darkened one of the circles (bubbles) for each of the questions. Extra time of 10 minutes beyond scheduled time is provided for this.**
11. **A candidate who has not darkened any of the five circles in more than 10% questions shall be disqualified.**
12. **Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt by the Commission as per rules.**

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted under **Rajasthan Public Examination (Measures for Prevention of Unfair Means in Recruitment) Act, 2022, other laws applicable and Commission's Regulations.** Commission may also debar him/her permanently from all future examinations.

उत्तर–पत्रक में दो प्रतियां हैं – मूल प्रति और कार्बन प्रति। परीक्षा समाप्ति पर परीक्षा कक्ष छोड़ने से पूर्व परीक्षार्थी उत्तर–पत्रक की दोनों प्रतियां वीक्षक को सौंपेंगे, परीक्षार्थी स्वयं कार्बन प्रति अलग नहीं करें। वीक्षक उत्तर–पत्रक की मूल प्रति को अपने पास जमा कर, कार्बन प्रति को मूल प्रति से कट लाईन से मोड़कर सावधानीपूर्वक अलग कर परीक्षार्थी को सौंपेंगे, **जिसे परीक्षार्थी अपने साथ ले जायेंगे। परीक्षार्थी को उत्तर–पत्रक की कार्बन प्रति चयन प्रक्रिया पूर्ण होने तक सुरक्षित रखनी होगी एवं आयोग द्वारा मांगे जाने पर प्रस्तुत करनी होगी।**

1. 'एधि' इति रूपं कस्य धातोः वर्तते?
(1) प्रच्छ् धातोः
(2) इण् धातोः
(3) अस् धातोः
(4) एध् धातोः
(5) अनुत्तरित प्रश्न

2. अव्ययीभावसमासे प्रायेण कस्य प्राधान्यं भवति?
(1) अन्यपदार्थस्य
(2) उभयपदार्थस्य
(3) पूर्वपदार्थस्य
(4) उत्तरपदार्थस्य
(5) अनुत्तरित प्रश्न

3. भासप्रणीतं रामकथाश्रितं रूपकमेतेषु वर्तते –
(1) अभिषेकमितिनाटकम्
(2) अविमारकम्
(3) दूतवाक्यम्
(4) पंचरात्रम्
(5) अनुत्तरित प्रश्न

4. निम्नलिखितासु देवर्षिकलानाथशास्त्रिणः रचना नास्ति –
(1) कथावल्लरी
(2) नाट्यवल्लरी
(3) आख्यानवल्लरी
(4) कवितावल्लरी
(5) अनुत्तरित प्रश्न

5. कृपयाविष्टमश्रुपूर्णाकुलेक्षणं विषीदन्तम् इत्यादीनि विशेषणानि कस्य वर्तन्ते?
(1) युधिष्ठिरस्य
(2) कर्णस्य
(3) अर्जुनस्य
(4) दुर्योधनस्य
(5) अनुत्तरित प्रश्न

6. वेदाध्ययनसम्पूर्तौ संस्कारः क्रियते –
(1) उपनयन संस्कारः
(2) विवाह संस्कारः
(3) समावर्तन संस्कारः
(4) वेदारम्भः संस्कारः
(5) अनुत्तरित प्रश्न

7. एतेषु शुद्धं वाक्यं चिनुत –
(1) त्वं लेखं लिखति
(2) अहं पठितुं शक्नोमि
(3) मनः सत्यात् शुध्यति
(4) वैदिकधर्मः सर्वधर्मात् प्राचीनः
(5) अनुत्तरित प्रश्न

8. "उदेति पूर्वं कुसुमं ततः फलम्" अत्र किं छन्दः?
(1) भुजङ्गप्रयातम्
(2) तोटकम्
(3) वंशस्थम्
(4) द्रुतविलम्बितम्
(5) अनुत्तरित प्रश्न

9. रुच्यर्थानां धातूनां प्रयोगे कोऽर्थः संप्रदानं स्यात्?
(1) प्रीयमाणः
(2) ईप्सितः
(3) अनुकूलः
(4) अप्रीतिपरकः
(5) अनुत्तरित प्रश्न

10. पतिशब्दस्य पञ्चमीविभक्तौ रूपं भवति –
(1) पतेः
(2) पत्याः
(3) पत्युः
(4) पत्यात्
(5) अनुत्तरित प्रश्न

11. मतिशब्दस्य द्वितीयाबहुवचने किं रूपम्?
(1) मतीः
(2) मतिन्
(3) मतयः
(4) मत्यः
(5) अनुत्तरित प्रश्न

12. हितोपदेशस्य परिच्छेदेषु न गण्यते –
(1) मित्रलाभः
(2) सन्धिः
(3) सुहृद्भेदः
(4) अपरीक्षितकारकम्
(5) अनुत्तरित प्रश्न

13. यत्र उपमानादुपमेयस्य आधिक्यं वर्ण्यते तत्र भवति –
(1) व्यतिरेकालङ्कारः
(2) दीपकालङ्कारः
(3) रूपकालङ्कारः
(4) दृष्टान्तालङ्कारः
(5) अनुत्तरित प्रश्न

14. अनुदात्तसञ्ज्ञाविधायकं सूत्रमस्ति –
(1) आदिरन्त्येन सहेता
(2) उच्चैरुदात्तः
(3) समाहारः स्वरितः
(4) नीचैरनुदात्तः
(5) अनुत्तरित प्रश्न

15. "अकः सवर्णे दीर्घः" इत्यस्योदाहरणमस्ति –
(1) वध्वालयः
(2) इत्याश्रमः
(3) श्रियायुद्यतः
(4) श्रीशः
(5) अनुत्तरित प्रश्न

16. 'पञ्चगङ्गम्' इत्यत्र कः समासः?

(1) तत्पुरुषः
(2) बहुव्रीहिः
(3) द्विगुः
(4) अव्ययीभावः
(5) अनुत्तरित प्रश्न

17. 'अलङ्कारशिरोरत्नं सर्वस्वं काव्यसम्पदाम्' इत्यत्र कविवंशस्य माता कथ्यते –

(1) उत्प्रेक्षा
(2) व्यतिरेकः
(3) उपमा
(4) रूपकम्
(5) अनुत्तरित प्रश्न

18. 'अर्धपिप्पली' इत्यस्य विग्रहवाक्यमस्ति –

(1) अर्धं पिप्पल्याः
(2) अर्धं पिप्पली यस्याः
(3) अर्धं पिप्पली
(4) अर्धः पिप्पल्याः
(5) अनुत्तरित प्रश्न

19. 'भुक्त्वा व्रजति' इत्यत्र क्त्वा प्रत्ययः केन सूत्रेण भवति?

(1) हलश्च
(2) उदितो वा
(3) समानकर्तृकयोः पूर्वकाले
(4) गुरोश्च हलः
(5) अनुत्तरित प्रश्न

20. यः समुद्रियः नावः पदं वेद सोऽस्ति –

(1) वरुणः
(2) इन्द्रः
(3) सञ्ज्ञानः
(4) अग्निः
(5) अनुत्तरित प्रश्न

21. 'राजा गुरु को हाथों से प्रणाम करता है।' इति वाक्यस्य शुद्धतमोऽनुवादः कः?

(1) राजा गुरवे हस्तेन नमते
(2) राज्ञः गुरवे हस्ताभ्यां प्रणामं करोति
(3) नृपः गुरुं हस्तात् प्रणमति
(4) राजा गुरुं हस्ताभ्यां प्रणमति
(5) अनुत्तरित प्रश्न

22. 'शिशुपालवधम्' इत्यस्य कथानकं महाभारतस्य कस्मिन् पर्वणि विद्यते?

(1) भीष्मपर्वणि
(2) वनपर्वणि
(3) शान्तिपर्वणि
(4) सभापर्वणि
(5) अनुत्तरित प्रश्न

23. "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इत्यत्र कस्य शब्दस्य प्रत्येकं योगः?

(1) वचनशब्दस्य
(2) परिमाणशब्दस्य
(3) लिङ्गशब्दस्य
(4) मात्रशब्दस्य
(5) अनुत्तरित प्रश्न

24. ''रूपवती भार्या यस्य सः'' इत्यस्य समस्तपदं वर्तते –

(1) रूपवद्भार्यः

(2) रूपवतीभार्यः

(3) रूपवद्भार्या

(4) रूपवन्भार्या

(5) अनुत्तरित प्रश्न

25. अयं कः वृद्धिचन्द्रशास्त्रिणः पुत्रोऽस्ति?

(1) पं. पद्मशास्त्री

(2) डॉ. प्रभाकरशास्त्री

(3) कलानाथशास्त्री

(4) भट्टमथुरानाथशास्त्री

(5) अनुत्तरित प्रश्न

26. छन्दो – लक्षणयोरसङ्गतं युग्मं चिनुत –

(1) मालिनी – ननमयययुतेयम्

(2) द्रुतविलम्बित – नभो भरौ

(3) वसन्ततिलका – तभजा जगो गः

(4) इन्द्रवज्रा – यदि तौ जगौ गौ

(5) अनुत्तरित प्रश्न

27. मनोगतान् सर्वान् कामान् विहाय आत्मनि एव तुष्टः सः कः उच्यते?

(1) स्थितप्रज्ञः

(2) आत्मस्थः

(3) योगस्थः

(4) स्थितधीः

(5) अनुत्तरित प्रश्न

28. 'हनूमानब्धिमतरद् दुष्करं किं महात्मनाम्' अत्र कोऽलङ्कारः?

(1) अर्थान्तरन्यासः
(2) दृष्टान्तः
(3) भ्रान्तिमान्
(4) दीपकम्
(5) अनुत्तरित प्रश्न

29. ''प्रस्थाय'' इत्यत्र प्रत्ययो वर्तते –

(1) क्यङ्
(2) ल्यप्
(3) ण्यत्
(4) क्यप्
(5) अनुत्तरित प्रश्न

30. यत्र उपमेयोपमानवाक्ययोः निर्दिष्टेषु भिन्नधर्मेषु बिम्बप्रतिबिम्बभावोऽस्ति तत्र अलंकारो भवति –

(1) दीपकालंकारः

(2) दृष्टान्तालंकारः

(3) यमकालंकारः

(4) उत्प्रेक्षालंकारः

(5) अनुत्तरित प्रश्न

31. 'चिरम्' इति अव्ययस्य कोऽर्थः?
(1) समुचितः
(2) बहुकालः
(3) शीघ्रकार्यम्
(4) मङ्गलम्
(5) अनुत्तरित प्रश्न

32. कादम्बरीकारो बाणभट्टः सभापण्डितः आसीत् –
(1) धाराधिपस्य भोजस्य
(2) निषिधाधिपस्य नलस्य
(3) कान्यकुब्जाधिपस्य हर्षदेवस्य
(4) उज्जयिन्यधिपस्य विक्रमस्य
(5) अनुत्तरित प्रश्न

33. अम्बिकादत्तव्यासप्रणीते शिवराजविजये कति निःश्वासाः सन्ति?
(1) पञ्च
(2) एकादश
(3) द्वादश
(4) अष्ट
(5) अनुत्तरित प्रश्न

34. "पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत" कोऽभिप्रेतः?
(1) अग्निः
(2) पुरुषः
(3) वरुणः
(4) इन्द्रः
(5) अनुत्तरित प्रश्न

35. औकारस्य उच्चारणस्थानमस्ति –
(1) कण्ठोष्ठम्
(2) मूर्धा
(3) ओष्ठः
(4) कण्ठतालु
(5) अनुत्तरित प्रश्न

36. जश्त्व – विधानं भवति –
(1) झलां स्थाने
(2) भषः स्थाने
(3) बशः स्थाने
(4) हशः स्थाने
(5) अनुत्तरित प्रश्न

37. अप्रस्तुतप्रस्तुतयोरेकधर्माभिसम्बन्धो किं निगद्यते?
(1) रूपकम्
(2) दीपकम्
(3) उत्प्रेक्षा
(4) यमकम्
(5) अनुत्तरित प्रश्न

38. "आपरितोषाद् विदुषां न साधु मन्ये प्रयोग–विज्ञानम्" इत्यस्मिन् वाक्ये उपसर्गाः सन्ति –
(1) द्वौ
(2) चत्वारः
(3) त्रयः
(4) पञ्च
(5) अनुत्तरित प्रश्न

39. "बालक के पिता से रास्ता पूछता है।" अस्य वाक्यस्य संस्कृते अनुवादो विधेयः –
(1) बालकस्य पितुः पन्थाः पृच्छति
(2) बालकस्य पितरि पन्थानं पृच्छति
(3) बालकस्य पित्रा पन्थानं पृच्छति
(4) बालकस्य पितरं पन्थानं पृच्छति
(5) अनुत्तरित प्रश्न

40. "जनिकर्त्तुः प्रकृतिः" इत्यनेन किं भवति?
(1) अधिकरणम्
(2) सम्प्रदानम्
(3) अपादानम्
(4) करणम्
(5) अनुत्तरित प्रश्न

41. 'मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्' इति कस्येदं कथनम्?
(1) कण्वस्य
(2) दुष्यन्तस्य
(3) विदूषकस्य
(4) सूतस्य
(5) अनुत्तरित प्रश्न

42. "शिवोऽर्च्यः" इत्यस्य सन्धिविच्छेदो भवति –
(1) शिवस् + अर्च्यः
(2) शिव + उर्च्यः
(3) शिव + अर्च्यः
(4) शिवस + अर्च्यः
(5) अनुत्तरित प्रश्न

43. दण्डिना दशकुमारचरिते मन्त्रगुप्तमुखेन निरोष्ठ्यवर्णप्रयोगः कारितः –
(1) अष्टमोच्छ्वासे
(2) षष्ठोच्छ्वासे
(3) सप्तमोच्छ्वासे
(4) पञ्चमोच्छ्वासे
(5) अनुत्तरित प्रश्न

44. पुरुषसूक्तसन्दर्भे सुमेलनं कुरुत –

| | |
|---|---|
| (क) चन्द्रमा | (i) प्राणात् |
| (ख) सूर्यः | (ii) मनसो |
| (ग) इन्द्रश्चाग्निः | (iii) चक्षोः |
| (घ) वायुः | (iv) मुखात् |

(1) (क)–(ii), (ख)–(iv), (ग)–(i), (घ)–(iii)
(2) (क)–(ii), (ख)–(iii), (ग)–(iv), (घ)–(i)
(3) (क)–(iii), (ख)–(iv), (ग)–(ii), (घ)–(i)
(4) (क)–(i), (ख)–(ii), (ग)–(iii), (घ)–(iv)
(5) अनुत्तरित प्रश्न

45. ''कारकः'' इत्यत्र 'कृ' धातोः प्रत्ययो भवति –

(1) ण्वुल् (2) घंञ्

(3) क्तः (4) क्यप्

(5) अनुत्तरित प्रश्न

46. समुचितं मेलनं कुरुत –

(क) वारीणि (i) तृतीयैकवचनम्

(ख) मधुनी (ii) सप्तमीद्विवचनम्

(ग) नद्या (iii) द्वितीयाद्विवचनम्

(घ) मत्योः (iv) द्वितीयाबहुवचनम्

(1) (क)–(ii), (ख)–(i), (ग)–(iv), (घ)–(iii)

(2) (क)–(iii), (ख)–(iv), (ग)–(ii), (घ)–(i)

(3) (क)–(i), (ख)–(ii), (ग)–(iii), (घ)–(iv)

(4) (क)–(iv), (ख)–(iii), (ग)–(i), (घ)–(ii)

(5) अनुत्तरित प्रश्न

47. "मुक्तेषु रश्मिषु निरायतपूर्वकायाः" वाक्येऽस्मिन् कस्तावदुपसर्गः?

(1) रश्मि (2) निर्

(3) आयत (4) पूर्व

(5) अनुत्तरित प्रश्न

48. द्वादशभिः सप्तभिश्च यत्र यतिर्भवति तद् वृत्तमस्ति –

(1) स्रग्धरा

(2) मालिनी

(3) शिखरिणी

(4) शार्दूलविक्रीडितम्

(5) अनुत्तरित प्रश्न

49. विश्वेदेवासूक्तस्य मण्डल–सूक्त–ऋषि–छन्दांसि वर्तन्ते –

(1) अष्टमम्–अष्टपञ्चाशत्–काण्वः–त्रिष्टुप्

(2) अष्टमम्–पञ्चाशत्–विश्वामित्रः–गायत्री

(3) अष्टमम्–पञ्चाशत्–अत्रिः–जगति

(4) अष्टमम्–अष्टाविंशतिः–वामदेवः–अनुष्टुप्

(5) अनुत्तरित प्रश्न

50. अचि परे इकः स्थाने आदेशो भवति –

(1) अलादेशः

(2) अजादेशः

(3) अयादेशः

(4) यणादेशः

(5) अनुत्तरित प्रश्न

51. एतेषु अव्ययं नास्ति –

(1) कति (2) अद्य

(3) यत्र (4) पुनः

(5) अनुत्तरित प्रश्न

52. स्रग्धरा सन्दर्भे किं संगतं नास्ति?
(1) अत्र एकविंशति वर्णाः भवन्ति।
(2) त्रिमुनियतियुता कीर्तितेयम्।
(3) सप्त–सप्त सप्तषु च यतिः भवति।
(4) मगणरगणभगणनगणतगणत्रय वर्णाः जायन्ते।
(5) अनुत्तरित प्रश्न

53. प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्तुरभू –
न्न पतिष्यतः करसहस्रमपि।।
इत्यत्रालङ्कारो वर्तते –
(1) यमकम्
(2) उत्प्रेक्षा
(3) निदर्शना
(4) श्लेषः
(5) अनुत्तरित प्रश्न

54. रूपकालङ्कारो भवति –
(1) एकस्यैव उपमानोपमेयत्वे सति।
(2) उपमेयस्य उपमानेन सह सम्भावनायाम्।
(3) उपमानोपमेययोरभेदवर्णने सति।
(4) उपमेयस्य उपमानाद् आधिक्यवर्णने सति।
(5) अनुत्तरित प्रश्न

55. एतेषु किं संगतं नास्ति?
(1) श्रृंगारशतकम् – काम–विलासादीनां वर्णनम्
(2) पञ्चतन्त्रम् – पञ्चखण्डेषु विभाजितम्
(3) वैराग्यशतकम् – अमरूककविना लिखितम्
(4) नीतिशतकम् – विद्या–उदारता–वीरतादीनां वर्णनम्
(5) अनुत्तरित प्रश्न

56. अधोलिखितेषु इत्सञ्ज्ञाविधायकं सूत्रं वर्तते –
(1) सुप्तिङन्तं पदम्
(2) अदर्शनं लोपः
(3) हलन्त्यम्
(4) तस्य लोपः
(5) अनुत्तरित प्रश्न

57. 'अपवर्गे तृतीया' अत्र अपवर्गपदस्यार्थः वर्तते –
(1) दानप्राप्तिः
(2) कर्मप्राप्तिः
(3) ज्ञानप्राप्तिः
(4) फलप्राप्तिः
(5) अनुत्तरित प्रश्न

58. ''सेव्'' धातोः लोट्लकारे उत्तमपुरुषैकवचने रूपं भवति –

(1) सेविताहे (2) सेवेय

(3) सेवै (4) सेवे

(5) अनुत्तरित प्रश्न

59. रघुवंशमहाकाव्यस्य कः सर्गः 'इन्दुमती–स्वयम्वर' रूपेण उत्कृष्टतां प्राप्नोति?

(1) प्रथमसर्गः

(2) षष्ठसर्गः

(3) सप्तमसर्गः

(4) चतुर्थसर्गः

(5) अनुत्तरित प्रश्न

60. जन्मनः प्राक् कति संस्काराः भवन्ति?

(1) त्रयः (2) पञ्च

(3) द्वौ (4) चत्वारः

(5) अनुत्तरित प्रश्न

61. 'एचोऽयवायावः' इति सूत्रं प्रवर्तते?

(1) मैवम् (2) यद्यपि

(3) तन्वङ्गी (4) पावकः

(5) अनुत्तरित प्रश्न

62. 'सन्तः स्वयं परहिते विहिताभियोगाः' इत्यत्र छन्दो वर्तते –

(1) द्रुतविलम्बितम्

(2) वसन्ततिलका

(3) वंशस्थवृत्तम्

(4) भुजङ्गप्रयातम्

(5) अनुत्तरित प्रश्न

63. चिह्नानुसारं छन्दो निर्धारयत –

''ऽऽऽ ऽ।। ।।। ऽऽ। ऽऽ। ऽऽ''

(1) वसन्ततिलका

(2) मन्दाक्रान्ता

(3) मालिनी

(4) शिखरिणी

(5) अनुत्तरित प्रश्न

64. यथोचितं परस्परं मेलयत –

(क) विष्णूदयः (i) ईदूदेद् द्विवचनं प्रगृह्यम्

(ख) हरेऽव (ii) एङि पररूपम्

(ग) गङ्गे अमू (iii) अकः सवर्णे दीर्घः

(घ) प्रेजते (iv) एङः पदान्तादति

(1) (क)–(i), (ख)–(ii), (ग)–(iii), (घ)–(iv)

(2) (क)–(ii), (ख)–(iii), (ग)–(iv), (घ)–(i)

(3) (क)–(iii), (ख)–(iv), (ग)–(i), (घ)–(ii)

(4) (क)–(iv), (ख)–(i), (ग)–(ii), (घ)–(iii)

(5) अनुत्तरित प्रश्न

65. ''धेनु'' शब्दस्य ''धेन्वाम्–धेनौ'' रूपे स्तः –

(1) सप्तम्येकवचनस्य

(2) पञ्चम्येकवचनस्य

(3) प्रथमाद्विवचनस्य

(4) षष्ठीबहुवचनस्य

(5) अनुत्तरित प्रश्न

66. आभ्याम् इत्यस्य मूलशब्दः कः वर्तते?

(1) अदस्
(2) अयम्
(3) इदम्
(4) अस्मद्
(5) अनुत्तरित प्रश्न

67. ''देवीचन्द्रगुप्तम्'' इत्यस्य प्रणेता वर्तते –

(1) भवभूतिः

(2) भासः

(3) विशाखदत्तः

(4) शूद्रकः

(5) अनुत्तरित प्रश्न

68. ''सुश्लेषवक्रघटनापटु सत्काव्यविरचनमिव'' इति कथनं केन सम्बद्धं वर्तते?

(1) अम्बिकादत्तव्यासेन

(2) दण्डिना

(3) विशाखदत्तेन

(4) सुबन्धुना

(5) अनुत्तरित प्रश्न

69. 'यतश्च निर्धारणम्' सूत्रस्योदाहरणे संगतं वाक्यं वर्तते –

(1) नृणां नृषु वा द्विजः श्रेष्ठः

(2) छात्राणां छात्रेभ्यः वा मैत्रः पटुः

(3) गच्छतां गच्छन् वा धावन् शीघ्रः

(4) गवां गवे वा कृष्णा बहुक्षीरा

(5) अनुत्तरित प्रश्न

70. ''विसर्जनीयस्य सः'' इति सूत्रेण सकारो भवति –

(1) खरि परे
(2) जशि परे
(3) अचि परे
(4) झलि परे
(5) अनुत्तरित प्रश्न

71. 'दशकुमारचरितम्' इत्यत्र कस्य कुमारस्य वर्णनं न प्राप्यते?

(1) विश्रुतस्य

(2) मन्त्रगुप्तस्य

(3) उपहारवर्मणः

(4) देवश्रुतस्य

(5) अनुत्तरित प्रश्न

72. वाल्मीकिरामायणे रामस्य वनवासवृत्तान्तः प्राप्यते –
(1) किष्किन्धाकाण्डे
(2) अरण्यकाण्डे
(3) बालकाण्डे
(4) अयोध्याकाण्डे
(5) अनुत्तरित प्रश्न

73. सत्यस्यापिहितं मुखं कस्मै अपावृणु?
(1) सत्यार्थप्रकाशाय
(2) सर्वलोकाय दृष्टये
(3) सत्यधर्माय दृष्टये
(4) सर्वजनहिताय
(5) अनुत्तरित प्रश्न

74. ईशावास्योपनिषत् केन सम्बद्धाऽस्ति?
(1) अथर्ववेदेन
(2) यजुर्वेदेन
(3) ऋग्वेदेन
(4) सामवेदेन
(5) अनुत्तरित प्रश्न

75. "यः सुन्वते पचते दुध्र आ चिद्
वाजं दर्दर्षि स किलासि सत्यः।"
इतिमन्त्रः केन सम्बद्धः वर्तते?
(1) वरुणेन
(2) अग्निना
(3) रुद्रेण
(4) इन्द्रेण
(5) अनुत्तरित प्रश्न

76. 'भदन्त' इति नाम्ना प्रसिद्धः कविरस्ति –
(1) अश्वघोषः
(2) माघः
(3) श्रीहर्षः
(4) भारविः
(5) अनुत्तरित प्रश्न

77. 'पुस्तकस्य पठनं करोति' अत्र सूत्रं प्रवर्तते –
(1) षष्ठी चानादरे
(2) जनिकर्तुः प्रकृतिः
(3) कर्तृकर्मणोः कृति
(4) यतश्च निर्धारणम्
(5) अनुत्तरित प्रश्न

78. अधोलिखितेषु शुद्धं वाक्यमस्ति –
(1) गेये कस्मात् विनीतो युवाम्
(2) गेये केन विनीतो वाम्
(3) गेये केन विनीताः युवाम्
(4) गेये केन विनीतौ युवाम्
(5) अनुत्तरित प्रश्न

79. ''लभ्'' धातोः लटि मध्यमपुरुषे रूपाणि भवन्ति –
(1) लभसे, लभेथे, लभध्वे
(2) लभस्व, लभाथे, लभाध्वे
(3) लभासे, लभथे, लभध्व
(4) लभिस्ये, लभाथाम्, लभथाः
(5) अनुत्तरित प्रश्न

80. एतेषु अव्ययं नास्ति –
(1) कदापि
(2) रायम्
(3) इदानीम्
(4) किमर्थम्
(5) अनुत्तरित प्रश्न

81. यमक–पदस्यार्थो भवति –
(1) रज्जिका
(2) शब्दसमूहः
(3) टीकायुक्तः
(4) युगलः
(5) अनुत्तरित प्रश्न

82. 'जहि' इति रूपं कस्य धातोर्वर्तते?
(1) हन् धातोः
(2) हि धातोः
(3) अस् धातोः
(4) हा धातोः
(5) अनुत्तरित प्रश्न

83. भट्टमथुरानाथशास्त्रिणो रचना नास्ति –
(1) गोपालवैभवम्
(2) आदर्शरमणी
(3) साहित्यवैभवम्
(4) जयपुरवैभवम्
(5) अनुत्तरित प्रश्न

84. 'विभूषणं मौनमपण्डितानाम्' इति सुभाषितं कस्य?
(1) भवभूतेः
(2) भर्तृहरेः
(3) नारायणपण्डितस्य
(4) विष्णुशर्मणः
(5) अनुत्तरित प्रश्न

85. 'यत्र निह्नुतिं विना हेत्वादिः उन्नीयते' तत्र अलङ्कारो जायते –
(1) उत्प्रेक्षा
(2) उपमा
(3) निदर्शना
(4) अनुप्रासः
(5) अनुत्तरित प्रश्न

86. शुद्धं वाक्यं चिनुत –
(1) भवन्तः विद्यायाः प्रमाणाः सन्ति
(2) दुर्जनः कन्यायाः अपहरति
(3) दशम्यां कक्षायां शतं छात्राः सन्ति
(4) दम्पती पुत्रम् अभाषत
(5) अनुत्तरित प्रश्न

87. 'हिमवतो गङ्गा प्रभवति' सूत्रस्योदाहरणमस्ति –
(1) आख्यातोपयोगे
(2) अपादाने पंचमी
(3) जनिकर्तुः प्रकृतिः
(4) भुवः प्रभवः
(5) अनुत्तरित प्रश्न

88. उत्तररामचरिते वीररस वर्णने प्रयुक्ता रीतिरस्ति?
(1) वैदर्भी
(2) पाञ्चाली
(3) लाटी
(4) गौडी
(5) अनुत्तरित प्रश्न

89. 'पाणी च पादौ च एषां समाहारः' इत्यस्य समस्तं पदं वर्तते –
(1) पाणिपादम्
(2) पाणिपादाः
(3) पाणिपादे
(4) पाणिपादानि
(5) अनुत्तरित प्रश्न

90. ''कृष्णौत्कण्ठ्यम्'' इत्यत्र सन्धिविधायकं सूत्रमस्ति –
(1) इको यणचि
(2) एङि पररूपम्
(3) वृद्धिरेचि
(4) आद् गुणः
(5) अनुत्तरित प्रश्न

91. लेनिनामृतम् महाकाव्ये कति सर्गाः सन्ति?
(1) पञ्चदश
(2) एकादश
(3) षोडश
(4) पञ्चविंशति
(5) अनुत्तरित प्रश्न

92. कालिदासस्य रचना न वर्तते –
(1) रघुवंशम्
(2) ऋतुसंहारम्
(3) कुमारशेखरम्
(4) मेघदूतम्
(5) अनुत्तरित प्रश्न

93. या निशा सर्वभूतानां तस्यां कः जागर्ति?

(1) गुडाकेशः

(2) संयमी

(3) स्थितप्रज्ञः

(4) योगी

(5) अनुत्तरित प्रश्न

94. पुरुषसूक्तसन्दर्भे संगतमस्ति –

(क) ऋषिः नारायणः (ख) अष्टादशऋचः

(ग) अन्त्या त्रिष्टुप् छन्दः (घ) अव्यक्त महदादिविलक्षणः चेतनपुरुषः देवता

(1) (क), (ख), (घ)

(2) (क), (ख)

(3) (क), (ख), (ग)

(4) (क), (ग), (घ)

(5) अनुत्तरित प्रश्न

95. श्रीमद्भगवद्गीतायाः द्वितीयाध्यायस्य किं नाम?

(1) कर्मयोगो नाम

(2) अर्जुनविषादयोगो नाम

(3) ज्ञानकर्मसंन्यासयोगो नाम

(4) सांख्ययोगो नाम

(5) अनुत्तरित प्रश्न

96. 'क्रोशं कुटिला नदी' इति कस्य सूत्रस्योदाहरणमस्ति?

(1) साधकतमं करणम्

(2) अकथितं च

(3) कालाध्वनोरत्यन्त संयोगे

(4) कर्तुरीप्सिततमं कर्म

(5) अनुत्तरित प्रश्न

97. द्रुतविलम्बितं छन्दः कस्मिन् पद्यांशे वर्तते?

(1) विधिरहो बलवानिति मे मतिः।

(2) यथा प्रकृत्या मधुरं गवां पयः।

(3) क्षीणोऽप्युपचीयते पुनश्चन्द्रः।

(4) हितं मनोहारि च दुर्लभं वचः।

(5) अनुत्तरित प्रश्न

98. मानवंशमहाकाव्यस्य रचनाकारः कः वर्तते?

(1) भट्टमथुरानाथशास्त्री

(2) सूर्यनारायणशास्त्री

(3) प्रभाकरशास्त्री

(4) कलानाथशास्त्री

(5) अनुत्तरित प्रश्न

99. श्रीमद्भगवद्गीतोक्त दिशा क्रोधोत्पत्तेः क्रमो वर्तते –

(1) विषयध्यानं–कामः–सङ्गः–क्रोधः

(2) विषयध्यानं–सङ्गः–कामः–क्रोधः

(3) कामः–विषयध्यानं–सङ्गः–क्रोधः

(4) सङ्गः–विषयध्यानं–कामः–क्रोधः

(5) अनुत्तरित प्रश्न

100. सूत्रोदाहरणयोः असमीचीनं युग्मं चिनुत –

(1) चोरात् त्रायते – भीत्रार्थानां भयहेतुः

(2) गोषु कृष्णा बहुक्षीरा – यतश्च निर्धारणम्

(3) जगतः कर्त्ता परमेश्वरः – षष्ठी चानादरे

(4) ईर्ष्यति मातापुत्राय – क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः

(5) अनुत्तरित प्रश्न

101. ढरेफयोर्लोपे पूर्वस्याणो दीर्घविधायकं सूत्रं वर्तते –

(1) ढ्रलोपे पूर्वस्य दीर्घोऽणः

(2) प्रथमयोः पूर्वसवर्णः

(3) अकः सवर्णे दीर्घः

(4) दीर्घाज्जसि च

(5) अनुत्तरित प्रश्न

102. पूर्वरूपविधायकं सूत्रं वर्तते –

(1) प्रथमयोः पूर्वसवर्णः

(2) उदः स्थास्तम्भोः पूर्वस्य

(3) पूर्वत्रासिद्धम्

(4) एङः पदान्तादति

(5) अनुत्तरित प्रश्न

103. नारायणपण्डितस्य आश्रयदाता राजा आसीत् –

(1) धवलचन्द्रः

(2) चन्द्रकृष्णः

(3) अमरशक्तिः

(4) कृष्णचन्द्रः

(5) अनुत्तरित प्रश्न

104. वर्णानामतिशयित – सन्निधेः सञ्ज्ञा भवति –

(1) संहितासञ्ज्ञा

(2) पदसञ्ज्ञा

(3) सवर्णसञ्ज्ञा

(4) संयोगसञ्ज्ञा

(5) अनुत्तरित प्रश्न

105. 'भूपत्युः सह आगच्छत्' अस्य शुद्ध रूपं वर्तते –

(1) भूपतिना सहेन आगच्छत्

(2) भूपतेः सह आगच्छत्

(3) भूपत्या सह आगच्छत्

(4) भूपतिना सह आगच्छत्

(5) अनुत्तरित प्रश्न

106. 'जगण–तगण–जगण–गुरु' अत्र छन्दो भवति –
(1) वंशस्थम्
(2) उपजाति
(3) इन्द्रवज्रा
(4) उपेन्द्रवज्रा
(5) अनुत्तरित प्रश्न

107. अधस्तनेषु लिखितेषु उपसर्गो नास्ति –
(1) गिर्
(2) दुर्
(3) निर्
(4) अति
(5) अनुत्तरित प्रश्न

108. "ओजायमानं यो अहिं जघान दानुं शयानं" सोऽस्ति –
(1) विष्णुः
(2) वरुणः
(3) इन्द्रः
(4) अग्निः
(5) अनुत्तरित प्रश्न

109. यथोचितं मेलनं कुरुत –

| | |
|---|---|
| (क) एतद् मुरारिः | (i) झयो होऽन्यतरस्याम् |
| (ख) विद्वाँल्लिखति | (ii) मोऽनुस्वारः |
| (ग) वाग्घरिः | (iii) तोर्लि |
| (घ) हरिं वन्दे | (iv) यरोऽनुनासिकेऽनुनासिको वा |

(1) (क)–(iii), (ख)–(i), (ग)–(ii), (घ)–(iv)
(2) (क)–(ii), (ख)–(iv), (ग)–(i), (घ)–(iii)
(3) (क)–(i), (ख)–(ii), (ग)–(iii), (घ)–(iv)
(4) (क)–(iv), (ख)–(iii), (ग)–(i), (घ)–(ii)
(5) अनुत्तरित प्रश्न

110. सुमेलनं कुरुत –

| | |
|---|---|
| (1) वसन्ततिलका | (क) एकविंशतिवर्णाः |
| (2) मालिनी | (ख) चतुर्दशवर्णाः |
| (3) शिखरिणी | (ग) पञ्चदशवर्णाः |
| (4) स्रग्धरा | (घ) सप्तदशवर्णाः |

(1) (1)–(ग), (2)–(घ), (3)–(ख), (4)–(क)
(2) (1)–(क), (2)–(ख), (3)–(ग), (4)–(घ)
(3) (1)–(घ), (2)–(ग), (3)–(ख), (4)–(क)
(4) (1)–(ख), (2)–(ग), (3)–(घ), (4)–(क)
(5) अनुत्तरित प्रश्न

111. अत्र समीचीनं युग्मं चिनुत –
(1) गुणेषु अक्षमा
(2) ईर्ष्यासूया
(3) क्रोधोऽनमर्षः
(4) द्रोहोऽपकारः
(5) अनुत्तरित प्रश्न

112. 'शुष्कः' इत्यत्र कः प्रत्ययः?

(1) ष्फः

(2) कः

(3) क्तः

(4) खः

(5) अनुत्तरित प्रश्न

113. 'भूयिष्ठां ते नम उक्तिं विधेम' इत्यनेन नमनं कस्मै देवाय विहितम्?

(1) इन्द्राय

(2) विष्णवे

(3) वरुणाय

(4) अग्नये

(5) अनुत्तरित प्रश्न

114. सहार्थेन युक्तेऽप्रधाने विभक्तिः भवति –

(1) तृतीया

(2) द्वितीया

(3) चतुर्थी

(4) षष्ठी

(5) अनुत्तरित प्रश्न

115. कृषि–पशुपालनं–वाणिज्यं कस्य कर्म कथ्यते?

(1) वैश्यस्य

(2) क्षत्रियस्य

(3) ब्राह्मणस्य

(4) कुलीनस्य

(5) अनुत्तरित प्रश्न

116. उपनयनसंस्कारसम्बन्धे एषु संगतं नास्ति –

(1) शूद्रस्य पञ्चविंशति वर्षे

(2) क्षत्रियस्य एकादश वर्षे

(3) वैश्यस्य द्वादश वर्षे

(4) ब्राह्मणस्य अष्टमे वर्षे

(5) अनुत्तरित प्रश्न

117. पञ्चमहायज्ञेषु न गण्यते –

(1) पितृयज्ञः

(2) वाजपेययज्ञः

(3) नृयज्ञः

(4) देवयज्ञः

(5) अनुत्तरित प्रश्न

118. अधोलिखितयोः कथनयोः सन्दर्भे समुचितं विकल्पं चिनुत –

कथनं (क) : पदान्तस्य सस्य सजुषश्च रुः स्यात्।

कथनं (ख) : अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति।

(1) कथनं (ख) असमीचीनम्

(2) कथनं (क) असमीचीनम्

(3) कथनं (क) तथा (ख) उभौ असमीचीनम्

(4) कथनं (क) तथा (ख) उभौ समीचीनम्

(5) अनुत्तरित प्रश्न

119. ''चक्रिण्ढौकसे'' इत्यत्र सन्धिविधायकं सूत्रमस्ति –
(1) स्तोः श्चुना श्चुः
(2) मोऽनुस्वारः
(3) शश्छोऽटि
(4) ष्टुना ष्टुः
(5) अनुत्तरित प्रश्न

120. ''शान्तः'' इत्यत्र सन्धिविधायकं सूत्रमस्ति –
(1) मोऽनुस्वारः
(2) यरोऽनुनासिकेऽनुनासिको वा
(3) अनुस्वारस्य ययि परसवर्णः
(4) नश्चाऽपदान्तस्य झलि
(5) अनुत्तरित प्रश्न

121. 'न पराभवमाप्नोति शक्रादपि कदाचन' कथनमिदं कस्य ग्रन्थस्य अस्ति?
(1) हितोपदेशस्य
(2) शृंगारशतकस्य
(3) पञ्चतन्त्रस्य
(4) वैराग्यशतकस्य
(5) अनुत्तरित प्रश्न

122. 'रामेण बाणेन हतो बाली' अत्र असंगतं वर्तते –
(1) रामेण – कर्तरि तृतीया
(2) हतो – कर्तरि क्तप्रत्ययः
(3) बाणेन – करणे तृतीया
(4) बाली – प्रथमा विभक्तिः
(5) अनुत्तरित प्रश्न

123. 'अधिपूर्वाणामेषाम् आधारः कर्म स्यात्' इत्यस्योदाहरणं नास्ति –
(1) अधिशेते वैकुण्ठं हरिः
(2) अध्यास्ते वैकुण्ठं हरिः
(3) अधि तिष्ठति वैकुण्ठं हरिः
(4) अधिवसति वैकुण्ठं हरिः
(5) अनुत्तरित प्रश्न

124. 'सुधां क्षीरनिधिं मथ्नाति' इत्यत्र 'क्षीरनिधिम्' इत्यस्य पदस्य कर्मसंज्ञाविधायकं सूत्रमस्ति –
(1) अधिशीङ्स्थासां कर्म
(2) कर्त्तुरीप्सिततमं कर्म
(3) अकथितं च
(4) उपान्वध्याङ्वसः
(5) अनुत्तरित प्रश्न

125. ''किमिव हि मधुराणां मण्डनं नाकृतीनाम्'' अत्र गणव्यवस्थां चिनुत –
(1) नगण, नगण, मगण, यगण, यगण
(2) नगण, मगण, यगण, नगण, यगण
(3) नगण, मगण, नगण, यगण, यगण
(4) नगण, नगण, यगण, मगण, यगण
(5) अनुत्तरित प्रश्न

126. 'पंकजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः' इत्यत्र कः अलंकारः?

(1) सन्देहः (2) व्यतिरेकः

(3) भ्रान्तिमान् (4) स्मृतिः

(5) अनुत्तरित प्रश्न

127. शूद्रकमते दिशः शून्याः कस्य?

(1) अमित्रस्य

(2) अपुत्रस्य

(3) मूर्खस्य

(4) दरिद्रस्य

(5) अनुत्तरित प्रश्न

128. "शिष्यः" इत्यत्र प्रत्ययो वर्तते –

(1) यत् (2) ण्यत्

(3) क्यप् (4) ल्यप्

(5) अनुत्तरित प्रश्न

129. 'एषा ध्वनिः श्रवणयोर्मूर्च्छति' इत्यस्य शुद्धं वाक्यमस्ति –

(1) एष ध्वनिना श्रवणमूर्च्छति

(2) एष ध्वनिः श्रवणयोर्मूर्छति

(3) एतत् ध्वनि श्रवणयोर्मूर्छतः

(4) एष ध्वनिं श्रावणमूर्च्छति

(5) अनुत्तरित प्रश्न

130. "पच्" धातोः लृटि मध्यमपुरुषद्विवचने, लोटि मध्यमपुरुषद्विवचने, लङि मध्यमपुरुषबहुवचने च रूपाणि भवन्ति –

(1) पचिष्यथः, पचताम्, अपचतम्

(2) पक्ष्यथ, पचत, अपचत्

(3) पक्ष्यथः, पचतम्, अपचत

(4) पक्ष्यतः, पक्ष्यतम्, अपचः

(5) अनुत्तरित प्रश्न

131. प्रयोगप्रामाण्यमवलोक्य उदाहरणानां साहाय्येन सामान्यीकृतस्य नियमस्य निर्धारण कस्मिन् विधौ भवति?

(1) निगमनविधिः

(2) प्रायोजनाविधिः

(3) ह्यूरिस्टिकविधिः

(4) आगमनविधिः

(5) अनुत्तरित प्रश्न

132. आकाङ्क्षानुगुणं प्रश्नाः पद्यशिक्षणस्य कस्मिन् विधौ भवन्ति?

(1) दण्डान्वयविधौ

(2) ह्यूरिस्टिकविधौ

(3) खण्डान्वयविधौ

(4) अन्वयविधौ

(5) अनुत्तरित प्रश्न

133. हर्बर्ट महोदयस्य अनुयायिनौ ट्यूइस्कॉन जिलर, विल्हेम रेन महोदयौ 'हर्बर्टपञ्चपदी' इत्यस्य पञ्चानां पदानां व्यावहारिकप्रयोगदृष्ट्या कं क्रमं निर्धारितवन्तौ?

(1) प्रस्तावना
प्रस्तुतीकरणम्
अनुप्रयोगः
तुलना
सामान्यीकरणम्

(2) प्रस्तावना
प्रस्तुतीकरणम्
तुलना
सामान्यीकरणम्
अनुप्रयोगः

(3) प्रस्तावना
स्पष्टता
सम्बद्धता
प्रणाली
विधिः

(4) विधिः
प्रणाली
तुलना
स्पष्टता
प्रस्तावना

(5) अनुत्तरित प्रश्न

134. ''ज्ञातादज्ञातं प्रति'' इति शिक्षणसूत्रस्य प्रयोगः पाठनकाले प्राधान्येन कस्मिन् सोपाने कर्तुं शक्यते?

(1) आदर्शवाचनकाले
(2) प्रस्तावनाप्रश्नेषु
(3) पुनरावृत्यात्मकप्रश्नेषु
(4) अनुवाचनकाले
(5) अनुत्तरित प्रश्न

135. नाटकशिक्षणसन्दर्भेऽसत्यं कथनमस्ति –

(1) व्याख्याविधौ अध्यापकः पात्राणां चरित्रस्य भावनाञ्च विश्लेषणं करोति।
(2) पात्राभिनये प्रत्येकं पात्रस्य कृते पृथक्–पृथक् व्यक्तयः संवादं कुर्वन्ति।
(3) आदर्शनाट्यविधौ अध्यापकः स्वयं पात्राणाम् अभिनयं करोति।
(4) कक्षाभिनयविधौ नाटकशिक्षणं गद्यशिक्षणवत् भवति।
(5) अनुत्तरित प्रश्न

136. प्राचीनकाले छात्रस्य प्रवेशसमये तस्य लेखन –
पट्टिकायामुपरि ''ॐ नमः सिद्धम्'' इति वाक्यलेखनाभ्यासः भवति स्म, इदमेव पुनः पुनः पठनाय कथ्यते स्म, अनेन शनैः शनैः छात्रः वाक्यस्य वर्णैः परिचितः भवति स्म। पठनशिक्षणस्य अयं विधिः केन नाम्ना ज्ञायते?

(1) वर्णोच्चारण विधिः
(2) अनुकरण विधिः
(3) चित्र विधिः
(4) ध्वनिसाम्य विधिः
(5) अनुत्तरित प्रश्न

137. अनुवादपाठयोजनायां विधिरयं नोपयुज्यते –

(1) शब्दकोषविधिः
(2) द्विभाषाविधिः
(3) पुस्तकविधिः
(4) अनुकरण–तुलनाविधिः
(5) अनुत्तरित प्रश्न

**138.** व्याकरणशिक्षणे अन्वेषणविधेः (ह्यूरिस्टिक विधेः) शिक्षणसोपानानाम् अयं क्रमः समुचितः विद्यते –

(1) समस्यायाः उपस्थापनम्, तत्वानां निरीक्षणम्–वर्गीकरणञ्च, परिकल्पना, परीक्षणम्, निष्कर्षः

(2) समस्यायाः उपस्थापनम्, परिकल्पना, परीक्षणम्, निष्कर्षः

(3) निष्कर्षः, परीक्षणम्, परिकल्पना, तत्वानां निरीक्षणम्, वर्गीकरणञ्च

(4) समस्यायाः उपस्थापनम्, परीक्षणम्, निरीक्षणम्, निष्कर्षः

(5) अनुत्तरित प्रश्न

**139.** सुलेखस्य अभ्यासाय कः विधिः न उपयुज्यते?

(1) प्रतिलेखः

(2) अभिलेखः

(3) अनुलेखः

(4) श्रुतलेखः

(5) अनुत्तरित प्रश्न

**140.** मानवस्वभावस्य अध्ययनपुरस्सरं विभिन्न–जीवनदर्शनानां ज्ञानसहितं संवादयुक्तं स्वस्थ–मनोरञ्जनसहितं कस्य शिक्षणस्य पाठयोजना निर्मीयते?

(1) नाटकशिक्षणपाठयोजना

(2) व्याकरणशिक्षणपाठयोजना

(3) कथाशिक्षणपाठयोजना

(4) पद्यशिक्षणपाठयोजना

(5) अनुत्तरित प्रश्न

**141.** भरतमुनिना नाट्यशास्त्रे नाटकस्य उद्देश्येषु इदं वर्जितं नास्ति –

(1) विश्रान्तिजननम्

(2) हितोपदेशजननम्

(3) हास्यजननम्

(4) विनोदजननम्

(5) अनुत्तरित प्रश्न

**142.** निम्नाङ्कितेषु किं वाक्यं पठनकौशलेन सह असम्बद्धता भजते?

(1) पठनेन जीवने मूर्खत्वं न जायते।

(2) पठनस्य प्रकारेषु व्यक्तिगतपठनम्, सामूहिकपठनम्, मौनपठनम्, सस्वरपठनम्, आदर्शपठनम्, अनुकरणपठनम् च अन्तर्भवन्ति।

(3) पठनकाले दृश्येन्द्रियस्य, ध्वनियन्त्रस्य, मस्तिष्कस्य समन्वयः च न जायते।

(4) पठनेन आरोग्यम्, बुद्धिः, शास्त्रेण सह प्रीतिः चेते गुणाः विकसन्ति।

(5) अनुत्तरित प्रश्न

**143.** व्याकरणशिक्षणे प्रकृतेः प्रत्ययस्य च स्पष्टज्ञानेन शब्दस्वरूपं कस्मिन् विधौ सुष्ठु अधिगम्यते?

(1) अर्थावबोधविधिः

(2) अन्वयव्यतिरेकविधिः

(3) सहयोगविधिः समवायविधिर्वा

(4) आगमनविधिः

(5) अनुत्तरित प्रश्न

**144.** "इयं छात्रैः शिक्षकैश्च प्रयुज्यमाना विद्या अस्ति, यतः शिक्षक अस्य उपकरण साहाय्येन निर्देशनं ददाति, छात्रश्च व्याख्याम् आत्मानः अभिव्यक्तिञ्च करोति" कथनमिदम् कस्य अस्ति?

(1) प्रोफेसर स्ट्रक

(2) जॉन डीवी

(3) चोम्स्की

(4) स्किनर

(5) अनुत्तरित प्रश्न

145. "पाठयोजना तत्कथनाय शीर्षकं ददाति, यत् शिक्षकस्य मार्गदर्शने दैनिकगतिविधीनां परिणामत्वेन प्राप्तव्यानाम् उपलब्धीनाम्, प्रयोक्तव्यानां साधनानां च वर्णनं करोति।" एतत् मतं कस्य अस्ति?

(1) शिक्षाशब्दकोशः

(2) बिनिंग बिनिंग च

(3) लैंडेन जोसेफ

(4) नेल्सन एल. बोसिंग

(5) अनुत्तरित प्रश्न

146. गद्यशिक्षणाध्यापने प्रथमपञ्चसोपानानां समुचितः क्रमः वर्तते –

(1) प्रस्तावना, आदर्शवाचनम्, अशुद्धिसंशोधनम्, काठिन्यनिवारणम्, अनुवाचनम्

(2) प्रस्तावना, उद्देश्यकथनम्, आदर्शवाचनम्, अशुद्धिसंशोधनम्, अनुवाचनम्

(3) उद्देश्यकथनम्, प्रस्तुतीकरणम्, प्रस्तावना, आदर्शवाचनम्, अनुवाचनम्

(4) प्रस्तावना, उद्देश्यकथनम्, प्रस्तुतीकरणम्, आदर्शवाचनम्, अनुवाचनम्

(5) अनुत्तरित प्रश्न

147. लेखने शिक्षणे नेत्रयोः, कर्णयोः, हस्तयोश्च प्रशिक्षणे बलं दत्त्वा प्रथम काष्ठे फलके वा निर्मितेषु वृहदक्षरेषु छात्रैः अङ्गुल्याः सञ्चालनस्य अभ्यासः करणीयः, ततः परं तेषु अक्षरेषु लेखन्याः पौनः पुन्येन आवर्तनं करणीयम्। एवं छात्राः अक्षराणां स्वरूपेण परिचिताः सन्तः लेखनमधिगच्छन्ति।
लेखनकौशलस्य कस्मिन् विधौ अनेन प्रकारेण शिक्ष्यते?

(1) जैकटॉट विधौ

(2) स्वतन्त्रानुकरण विधौ

(3) अनुलेख–प्रतिलेख विधौ

(4) मोन्टेसरी विधौ

(5) अनुत्तरित प्रश्न

148. पूर्वसूरिभिः वर्णितानि जीवने अनुभवेन प्राप्तानि उदाहरणानि च अध्यापकेन विषयावबोधदृष्ट्या छात्रेभ्यः सारल्येन कस्मिन् कौशले बोध्यन्ते?

(1) दृष्टान्तकौशले

(2) व्याख्याकौशले

(3) प्रेरकवैविध्यकौशले

(4) प्रस्तावनाकौशले

(5) अनुत्तरित प्रश्न

149. अध्यापनकाले एकैकशब्दस्य विश्लेषणेन सह श्लोकार्थः, श्लोकस्य रचनाशैली, कविपरिचयः, सन्दर्भः, प्रसङ्गः, भावार्थः, अलङ्कारछन्दस्सु प्रकाशश्च अस्मिन् विधौ विशेषरूपेण निरूप्यते –

(1) व्याख्याविधौ

(2) खण्डान्वयविधौ

(3) दण्डान्वयविधौ

(4) भाषानुवादविधौ

(5) अनुत्तरित प्रश्न

150. यत् कौशलं छात्राणां पूर्वज्ञानस्य परीक्षणं करोति, तत् वर्तते –

(1) व्याख्या

(2) पाठ–प्रस्तावना

(3) दृष्टान्तम्

(4) प्रश्नोत्तरम्

(5) अनुत्तरित प्रश्न

-----------------------------------------

रफ कार्य के लिए जगह